श्री विष्णु विजय स्तोत्रं

श्री विष्णु विजय स्तोत्रं

देवा ऊचुः |
नताः स्म विष्णुं जगदादिभूतं
सुरासुरेंद्रं जगतां प्रपालकं |
यन्नाभिपद्मात् किल पद्मयोनि-
-र्बभूव तं वै शरणं गताः स्मः || 1 ||

नमो नमो मत्स्यवपुर्धराय
नमोऽस्तु ते कच्छपरूपधारिणे |
नमः प्रकुर्मश्च नृसिंहरूपिणे
तथा पुनर्वामनरूपिणे नमः || 2 ||

नमोऽस्तु ते क्षत्रविनाशनाय
रामाय रामाय दशास्यनाशिने |
प्रलंबहंत्रे शितिवाससे नमो
नमोऽस्तु बुद्धाय च दैत्यमोहिने || 3 ||

म्लेच्छांतकायापि च कल्किनाम्ने
नमः पुनः क्रोडवपुर्धराय |
जगद्धितार्थं च युगे युगे भवान्
बिभर्ति रूपं त्वसुराभवाय || 4 ||

निषूदितोऽयं ह्यधुना किल त्वया
दैत्यो हिरण्याक्ष इति प्रगल्भः |
यश्चेंद्रमुख्यान् किल लोकपालान्
संहेलया चैव तिरश्चकार || 5 ||

स वै त्वया देवहितार्थमेव
निपातितो देववर प्रसीद |
त्वमस्य विश्वस्य विसर्गकर्ता
ब्राह्मेण रूपेण च देवदेव || 6 ||

पाता त्वमेवास्य युगे युगे च
रूपाणि धत्से सुमनोहराणि |
त्वमेव कालाग्निहरश्च भूत्वा
विश्वं क्षयं नेष्यसि चांतकाले || 7 ||

अतो भवानेव च विश्वकारणं
न ते परं जीवमजीवमेव च |
यत्किंच भूतं च भविष्यरूपं
प्रवर्तमानं च तथैव रूपं || 8 ||

सर्वं त्वमेवासि चराचराख्यं
न भाति विश्वं त्वदृते च किंचित् |
अस्तीति नास्तीति च भेदनिष्ठं
त्वय्येव भातं सदसत्स्वरूपं || 9 ||

ततो भवंतं कतमोऽपि देव
न ज्ञातुमर्हत्यविपक्वबुद्धिः |
कृते भवत्पादपरायणं जनं
तेनागताः स्मः शरणं शरण्यं || 10 ||

व्यास उवाच |
ततो विष्णुः प्रसन्नात्मा उवाच त्रिदिवौकसः |
तुष्टोऽस्मि देवा भद्रं वो युष्मत् स्तोत्रेण सांप्रतं || 11 ||

य इदं प्रपठेद्भक्त्या विजयस्तोत्रमादरात् |
न तस्य दुर्लभं देवास्त्रिषु लोकेषु किंचन || 12 ||

गवां शतसहस्रस्य सम्यग्दत्तस्य यत्फलं |
तत्फलं समवाप्नोति कीर्तनश्रवणान्नरः || 13 ||

सर्वकामप्रदं नित्यं देवदेवस्य कीर्तनं |
अतः परं महाज्ञानं न भूतं न भविष्यति || 14 ||

इति पद्मपुराणोक्तं श्री विष्णु विजय स्तोत्रं |